**Series ωZWYX/C** **Set-4**

प्रश्न-पत्र कोड
Q.P. Code **52**

रोल नं.
Roll No.

परीक्षार्थी प्रश्न-पत्र कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।
Candidates must write the Q.P. Code on the title page of the answer-book.

# संस्कृतम्
# SANSKRIT

*अवधि : **होरात्रयम्*** *पूर्णाङ्काः : **80***
*निर्धारित समय : **3** घण्टे* *अधिकतम अंक : **80***
*Time allowed : **3** hours* *Maximum Marks : **80***

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **15** हैं ।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए प्रश्न-पत्र कोड को परीक्षार्थी उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें ।
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में **18** प्रश्न हैं ।
- **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, उत्तर-पुस्तिका में प्रश्न का क्रमांक अवश्य लिखें ।**
- इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे ।

- Please check that this question paper contains **15** printed pages.
- Q.P. Code given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains **18** questions.
- **Please write down the serial number of the question in the answer-book before attempting it.**
- 15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer-book during this period.

***General Instructions :***

1. *Question paper is divided into **four** sections.*

2. *It has total **18** questions.*
    - *Section A : 1 question no. 1*
    - *Section B : 3 questions no. 2 to 4*
    - *Section C : 7 questions no. 5 to 11*
    - *Section D : 7 questions no. 12 to 18*

3. *Attempt questions as per specific instructions.*

4. *Write question no. in answer book before attempting it.*

**खण्डः 'क'** ***(10 अङ्काः)***

**अपठितावबोधनम्**

**1.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत। *10*

मनुष्याणां कृते स्वास्थ्यं सर्वसाधकमस्ति । स्वस्थे शरीरे एव स्वस्थं मस्तिष्कम् उन्नताः विचाराः च भवन्ति । यदि शरीरं स्वस्थं स्यात् तर्हि शारीरिकं मानसिकं वा सर्वाणि कार्याणि सरलतया भवन्ति । परं स्वास्थ्यं केवलं पौष्टिकभोजनेन न प्राप्यते अपितु तत्कृते व्यायामस्य अपि आवश्यकता विद्यते । व्यायामेन पाचनशक्तिः वर्धते । नियमतः एव क्रियमाणो व्यायामः फलप्रदो भवति । व्यायामेन देहे कर्मण्यता तेजस्विता सहिष्णुता च आयाति । शरीरस्य सर्वेषु भागेषु सम्यक्तया रक्तसञ्चारो भवति, बलं च वर्धते, रोगाश्च नश्यन्ति । इत्थं व्यायामेन अनेके लाभाः भवन्ति; अतः ये जनाः अधिकं व्यायामं कर्तुं न शक्नुवन्ति ते केवलं प्रातः सायं वा भ्रमणम् एव कुर्युः । उक्तं च 'व्यायामो हि आरोग्यकरः' ।

अ. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) *2×1=2*

(i) केषां कृते स्वास्थ्यं सर्वसाधकमस्ति ?

(ii) पाचनशक्तिः केन वर्धते ?

(iii) ये अधिकं व्यायामं कर्तुं न शक्नुवन्ति ते केवलं किं कुर्युः ?

आ. पूर्णवाक्येन लिखत – (केवलं प्रश्नद्वयम्) *2×2=4*

(i) उन्नताः विचाराः कुत्र भवन्ति ?

(ii) सर्वाणि कार्याणि कदा सरलतया भवन्ति ?

(iii) व्यायामेन के के लाभाः भवन्ति ?

इ. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत। *1*

ई. यथानिर्देशम् उत्तरत – (केवलं प्रश्नत्रयम्) *3×1=3*

(i) 'ते केवलं भ्रमणम् एव कुर्युः' अत्र किं क्रियापदम् ?

(a) भ्रमणम्

(b) ते

(c) एव

(d) कुर्युः

(ii) 'अनेके' इति विशेषणपदस्य विशेष्यपदं किम् ?

(a) लाभाः

(b) कार्याणि

(c) रोगाः

(d) बलम्

(iii) 'काठिन्येन' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम् ?

(a) देहे

(b) भागेषु

(c) सरलतया

(d) आवश्यकता

(iv) 'नियमतः एव क्रियमाणो व्यायामः फलप्रदो भवति' वाक्ये 'भवति' इति क्रियायाः कर्तृपदं किम् ?

(a) नियमतः

(b) व्यायामः

(c) फलप्रदः

(d) क्रियमाणः

## खण्डः 'ख' *(15 अङ्काः)*

## रचनात्मकं-कार्यम्

**2.** अथर्वः दिल्लीनगरे वसति। तस्य मित्रं कृष्ण: मुंबईनगरे निवसति। अथर्वस्य विद्यालये पर्यावरणविषये एका गोष्ठी जाता। गोष्ठीं वर्णयन् अथर्वः कृष्णाय एकं पत्रम् लिखति। मञ्जूषातः समुचितपदानि चित्वा पत्रं पूरयतु। $10\times\frac{1}{2}=5$

221, गगनविहारः

नवदिल्लीतः

(i) _______ कृष्ण !

नमस्ते।

ह्यः अस्माकं विद्यालये (ii) _______ एका महत्त्वपूर्णा गोष्ठी अभवत्। तत्र महानगरेषु वर्धमानं प्रदूषणं दृष्ट्वा (iii) _______ रक्षणोपायानां विषये चर्चा अभवत्। गोष्ठ्यां वक्तृणां विचारसारः आसीत् यत् गृहात् बहिः (iv) _______ च अवकरः न क्षेपणीयः। (v) _______ समये-समये जलशुद्धिः करणीया। मार्गेषु उद्यानेषु विद्यालयेषु च अधिकाधिकं (vi) _______ आरोपणीयाः। जनजागरणार्थं 'वृक्षो रक्षति रक्षितः', 'जलम् एव जीवनम्' एतादृशानि महावाक्यानि पट्टिकासु लिखित्वा यत्र तत्र (vii) _______ । ध्वनिप्रदूषणं निवारयितुं ध्वनिप्रसारणयन्त्राणां (viii) _______ प्रयोगः करणीयः। अस्मिन् विषये भवतः (ix) _______ किं किं भवति इति विस्तरेण लिखतु।

पितरौ वन्दनीयौ।

भवतः मित्रम्

(x) _______

**मञ्जूषा**

| |
|---|
| विद्यालये, अथर्वः, नदीजलेषु, पर्यावरणविषये, न्यूनतमः, वृक्षाः, पर्यावरणस्य, प्रदर्शनीयानि, जलप्रदूषणनिवारणाय, प्रियमित्र। |

**3.** (क) प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया **पञ्च** वाक्यानि संस्कृतेन लिखत। *5×1=5*



**मञ्जूषा**

| |
|---|
| वातावरणम्, ग्रामस्य, महिलाः, एकः, वृक्षाः, साधारणम्, गृहे, ग्रामीणपरिवेशः, कुक्कुरः, जलस्य, भोजनम्, द्वे, आनयन्ति, जलम्, समस्या, स्वच्छम्, पचतः। |

**अथवा**

(ख) मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य न्यूनातिन्यूनं **पञ्चभिः** संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत। *5×1=5*

**'प्रातःभ्रमणम्'**

**मञ्जूषा**

| |
|---|
| वृक्षाः, जनाः, पवनः, प्रतिदिनम्, शीतलः, स्वास्थ्याय, आवश्यकम्, सूर्योदयः, आनन्दम्, अनुभवन्ति, उद्याने, वहति। |

**4.** अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत। (केवलं वाक्य**पञ्च**कम्) *5×1=5*

(i) हमने कहानियों की पुस्तकें पढ़ीं।
We read storybooks.

(ii) बन्दर वृक्ष पर कूद रहे हैं।
The monkeys are jumping on the tree.

(iii) आपका कार्य उत्तम था।
Your work was the best.

(iv) छात्रा ! सदा सत्य बोलो।
Students ! Always speak the truth.

(v) हम सब मिलकर गाएँगे।
We will sing together.

(vi) हमारा देश भारत है।
Our nation is India.

(vii) गंगा का जल पवित्र होता है।
The water of Ganga is pure.

## खण्डः 'ग' *(25 अङ्काः)*

## अनुप्रयुक्तव्याकरणम्

**5.** अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत। (केवलं प्रश्नचतुष्टयम्) *4×1=4*

(i) आचारः प्रथमः + धर्मः इत्येतद् विदुषां वचः।

(ii) कश्चन चौरः गृहाभ्यान्तरं प्रविष्टः।

(iii) कः इदं दुष्करं कुर्यात् + इदानीं शिविना विना ?

(iv) जगत्पतेः सृष्टिरेषा रमणीया।

(v) यदि न स्यान्नरपतिः।

**6.** अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत । (केवलं प्रश्नचतुष्टयम्) *4×1=4*

(i) व्याघ्रमारी इयम् इति मत्वा व्याघ्रो भयाकुलचित्तः नष्टः ।

(a) भयात् आकुलः चित्तः

(b) भयात् आकुलं चित्तम्

(c) भयेन आकुलः चित्तः

(d) भयेन आकुलं चित्तं यस्य सः

(ii) किं द्वयोरप्येकमेव प्रतिवचनम् ।

(a) वचनं वचने प्रति

(b) वचनं वचनम् इति

(c) वचने वचनं इति

(d) वचनेन वचनेन इति

(iii) ततः प्रविशतः विदूषकेनोपदिश्यमानमार्गौ तापसौ कुशलवौ ।

(a) कुशः च लवः च

(b) लवः च कुशः च

(c) लवयोः च कुशयोः च

(d) कुशस्य च लवस्य च

(iv) पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि ।

(a) पुत्रदैन्यम्

(b) पुत्रदैन्यः

(c) दीनपुत्रः

(d) पुत्रदीनताम्

(v) मलेन सह धरातलम् ।

(a) समलः

(b) मलसहितम्

(c) समलम्

(d) समले

**7.** अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत। (केवलं प्रश्नचतुष्टयम्) *4×1=4*

(i) हरिततरूणां ललितलतानां माला रमणीया।

(a) रमणीय + आ

(b) रमणीया + आ

(c) रमणीय + टाप्

(d) रमणी + इन्

(ii) अद्य मम वर्ष + ठक् परीक्षा अस्ति।

(a) वार्षिकः

(b) वार्षिकी

(c) वार्षिक्यः

(d) वार्षिकम्

(iii) हिमकरस्य शीतल + त्व लोके प्रसिद्धम् अस्ति।

(a) शीतलत्व

(b) शीतलत्वम्

(c) शीतलता

(d) शीतलत्वाम्

(iv) सा तपस्विनी मत्कृतेनापराधेन स्वापत्यम् एवं निर्भर्त्सयति।

(a) तपस्विन् + ङीप्

(b) तपस् + विनि

(c) तपस्वी + णिनि

(d) तपस्विन् + इन्

(v) युद्धे बल + मतुप् जनः एव विजयं लभते।

(a) बलमती

(b) बलवान्

(c) बलवती

(d) बलवत्यः

**8.** वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत । (केवलं प्रश्नत्रयम्) *3×1=3*

(i) प्रणवः – सुधे ! किं त्वम् सांस्कृतिक-कार्यक्रमे भागं __________ ?

(a) गृह्णाति

(b) गृह्णासि

(c) गृह्णामि

(d) गृह्यते

(ii) सुधा – आम् प्रणव ! मया तत्र गीतानि __________ ।

(a) गायामि

(b) गायन्ति

(c) गीयन्ते

(d) गीयते

(iii) प्रणवः – किम् छात्राः तत्र __________ अपि प्राप्नुवन्ति ?

(a) पुरस्कारः

(b) पुरस्कारेण

(c) पुरस्काराणाम्

(d) पुरस्कारान्

(iv) सुधा – आम् सखे ! तत्र वार्षिकोत्सवे __________ पुरस्काराः प्राप्यन्ते ।

(a) छात्रैः

(b) छात्राः

(c) छात्रेभ्यः

(d) छात्रान्

**9.** कालबोधकशब्दैः अधोलिखित-दिनचर्यां पूरयत : (केवलं प्रश्नचतुष्टयम्) *4×1=4*

(i) मम विद्यालये संस्कृतदिवसे प्रातः 9:00 वादने सरस्वती-वन्दना अभवत्।

(ii) तदा 9:15 वादने एका छात्रा भाषायाः महत्त्वम् अवदत्।

(iii) तदन्तरम् 9:30 वादने एका समूहनृत्यप्रस्तुतिः अभवत्।

(iv) 9:45 वादने मम कक्षायाः बालिकाः एकां नाटिकां प्रस्तुतवत्यः।

(v) अन्ते 10:00 वादने शान्तिपाठः अभवत्।

**10.** मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत : (केवलं त्रयम्) *3×1=3*

(i) व्याघ्रोऽपि _______________ नष्टः गलबद्धः शृगालकः।

(ii) यत्रास्ते सा धूर्ता _______________ गम्यताम्।

(iii) सः दीनः इति जानन् _______________ कृषकः तं बहुधा पीडयति।

(iv) यदा मेघाः गर्जन्ति _______________ वर्षा भवति।

**मञ्जूषा**

| तत्र, अपि, तदा, सहसा |
|---|

**11.** अधोलिखितवाक्येषु रेखाङ्कित – अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत। (केवलं त्रयम्) *3×1=3*

(i) यूयं पाठं <u>पठति</u>।

(a) पठथ

(b) पठसि

(c) पठन्ति

(d) पठथः

(ii) वृक्षे अनेकानि <u>आम्रम्</u> सन्ति।

(a) आम्रे

(b) आम्राणि

(c) आम्रस्य

(d) आम्रेषु

(iii) सा तत्र <u>सखी</u> प्रति गच्छति।

(a) सखीम्

(b) सखिषु

(c) सखीनाम्

(d) सख्याम्

(iv) राधा श्वः मम गृहम् <u>अगच्छत्</u>।

(a) आगमिष्यति

(b) आगच्छति

(c) गच्छतु

(d) गमिष्यति

## खण्डः 'घ' *(30 अङ्काः)*

## पठितावबोधनम्

**12.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत। *5*

अग्रिम दिने स आरक्षी चौर्याभियोगे तं न्यायालयं नीतवान्। न्यायाधीशो बंकिमचन्द्रः उभाभ्यां पृथक् पृथक् विवरणं श्रुतवान्। सर्वं वृत्तमवगत्य सः तं निर्दोषम् अमन्यत आरक्षिणं च दोषभाजनम्। किन्तु प्रमाणाभावात् स निर्णेतुं नाशक्नोत्। ततोऽसौ तौ अग्रिमे दिने उपस्थातुम् आदिष्टवान्। अन्येद्युः तौ न्यायालये स्व स्व पक्षं पुनः स्थापितवन्तौ। तदैव कश्चिद् तत्रत्यः कर्मचारी समागत्य न्यवेदयत् यत् इतः क्रोशद्वयान्तराले कश्चिज्जनः केनापि हतः। तस्य मृतशरीरं राजमार्गम् निकषा वर्तते। आदिश्यतां किं करणीयमिति। न्यायाधीशः आरक्षिणम् अभियुक्तं च तं शवं न्यायालये आनेतुमादिष्टवान्।

अ. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) $2\times\frac{1}{2}=1$

(i) न्यायाधीशस्य नाम किम्?

(ii) न्यायाधीशः तम् अतिथिं कीदृशम् अमन्यत?

(iii) तौ कुत्र स्व स्व पक्षं स्थापितवन्तौ?

आ. पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्) $2\times1=2$

(i) न्यायाधीशः किम् आदिष्टवान्?

(ii) कर्मचारी किं न्यवेदयत्?

(iii) न्यायाधीशः किमर्थं निर्णेतुं नाशक्नोत्?

इ. निर्देशानुसारम् उत्तरत – (केवलं प्रश्नद्वयम्) *2×1=2*

(i) 'न्यवेदयत्' इति क्रियापदस्य किं कर्तृपदम् अत्र प्रयुक्तम् ?

(ii) 'अग्रिमे' इति विशेषणपदस्य विशेष्यपदं किम् ?

(iii) 'दूरम्' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम् ?

**13.** अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत। *5*

गुणी गुणं वेत्ति न वेत्ति निर्गुणो,
बली बलं वेत्ति न वेत्ति निर्बलः।
पिको वसन्तस्य गुणं न वायसः,
करी च सिंहस्य बलं न मूषकः ॥

अ. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) $2 \times \frac{1}{2} = 1$

(i) कीदृशः जनः गुणं जानाति ?

(ii) कीदृशः जनः गुणं न जानाति ?

(iii) सिंहस्य बलं को जानाति ?

आ. पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्) *2×1=2*

(i) वसन्तस्य गुणं कः जानाति कः च न जानाति ?

(ii) मूषक: कस्य बलं न जानाति ?

(iii) कः बलस्य गुणं जानाति कः च न जानाति ?

इ. भाषिककार्यम् – (केवलं प्रश्नद्वयम्) *2×1=2*

(i) श्लोके 'जानाति' इति पदस्य पर्यायपदं किम् आगतम् ?

(ii) 'गुणी गुणं वेत्ति' अत्र कर्तृपदं किम् ?

(iii) 'निर्बलः' इति पदस्य विपर्ययपदं किम् अत्र प्रयुक्तम् ?

**14.** अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत। *5*

*रामः* – (स्वगतम्) धिङ् मामेवंभूतम्। सा तपस्विनी मत्कृतेनापराधेन स्वापत्यमेवं मन्युगर्भैरक्षरैर्निर्भर्त्सयति। (सवाष्पमवलोकयति)

*रामः* – अतिदीर्घः प्रवासोऽयं दारुणश्च। (विदूषकमवलोक्य जनान्तिकम्) कुतूहलेनाविष्टो मातरमनयोर्नामतो वेदितुमिच्छामि। न युक्तं च स्त्रीगतमनुयोक्तुम्, विशेषतस्तपोवने। तत् कोऽत्राभ्युपायः ?

*विदूषकः* – (जनान्तिकम्) अहं पुनः पृच्छामि। (प्रकाशम्) किं नामधेया युवयोर्जननी ?

*लवः* – तस्याः द्वे नामनी।

*विदूषकः* – कथमिव ?

*लवः* – तपोवनवासिनो देवीति नाम्नाह्वयन्ति, भगवान् वाल्मीकिर्वधूरिति।

*रामः* – अपि च इतस्तावद् वयस्य ! मुहूर्त्तमात्रम्।

*विदूषकः* – (उपसृत्य) आज्ञापयतु भवान्।

*रामः* – अपि कुमारयोरनयोरस्माकं च सर्वथा समरूपः कुटुम्बवृत्तान्तः ?

अ. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) $2\times\frac{1}{2}=1$

(i) अतिदीर्घः कः आसीत् ?

(ii) कुशलवयोः मातरं के 'देवी' इति नाम्ना आह्वयन्ति ?

(iii) भगवान् वाल्मीकिः कुमारयोः जननीं किमुक्त्वा आह्वयन्ति ?

आ. पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्) *2×1=2*

(i) रामः विशेषतः तपोवने किं युक्तं न मन्यते ?

(ii) श्रीरामस्य कुमारयोः च कः सर्वथा समरूपः आसीत् ?

(iii) कः कुमारयोः जनन्याः नाम पृच्छति ?

इ. भाषिककार्यम् – (केवलं प्रश्नद्वयम्) *2×1=2*

(i) 'माता' इत्यर्थे किं पदम् अत्र प्रयुक्तम् ?

(ii) 'भवान्' इति कर्तृपदस्य किं क्रियापदम् अत्र प्रयुक्तम् ?

(iii) 'मन्युगर्भैः अक्षरैः' अनयोः पदयोः विशेषणपदं किम् ?

**15.** रेखाङ्कित – पदानि आधृत्य प्रश्ननिर्माणं कुरुत। (केवलं प्रश्नचतुष्टयम्) *4×1=4*

(i) पतङ्गाः अम्बरपथम् आपेदिरे।

(ii) धेनूनां माता सुरभिः आसीत्।

(iii) त्वं मानुषात् विभेषि।

(iv) प्रस्तरतले लतातरुगुल्मा पिष्टाः न भवन्तु।

(v) मयूरस्य नृत्यं प्रकृतेः आराधना।

**16.** मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयित्वा पुनः लिखत। *4×1=4*

दुष्कराण्यपि कर्माणि मतिवैभवशालिनः।

नीतिं युक्तिं समालम्ब्य लीलयैव प्रकुर्वते॥

**अन्वयः –**

मतिवैभवशालिनः (जनाः) (i) ____________ युक्तिं (च) (ii) ____________ दुष्कराणि (iii) ____________ कर्माणि (iv) ____________ एव प्रकुर्वते।

**मञ्जूषा**

| |
|---|
| लीलया, नीतिम्, अपि, समालम्ब्य |

**अथवा**

अधोलिखितश्लोकस्य भावार्थं मञ्जूषातः उचितपदानि चित्वा पूरयत। *4×1=4*

काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः।

वसन्तसमये प्राप्ते काकः काकः पिकः पिकः॥

**भावार्थः –**

अस्य भावोऽस्ति यत् (i) ____________ वर्णः कृष्णः वर्तते पिकस्य अपि वर्णः (ii) ____________ एव अस्ति। अतः तयोः पिके काके च कः भेदः अस्ति। अर्थात् वर्णदृष्ट्या तयोः कश्चिद् भेदो न दृश्यते। परन्तु यदा (iii) ____________ समयः आगच्छति तदा तयोः स्वरैः ज्ञायते यत् कः (iv) ____________ अस्ति कश्च पिको वर्तते।

**मञ्जूषा**

| |
|---|
| वसन्तस्य, काकस्य, काकः, कृष्णः |

**17.** अधोलिखितानि वाक्यानि घटनाक्रमानुसारं संयोज्य पुनः लिखत। $8\times\frac{1}{2}=4$

(i) कृषकः तं दुर्बलं वृषभं तोदनेन अवर्तत।

(ii) तस्य समीपे द्वौ बलीवर्दौ आस्ताम्।

(iii) एकः कृषकः आसीत्।

(iv) भूमौ स्वपुत्रं पतितं दृष्ट्वा माता सुरभिः अश्रूणि अमुञ्चत् ।

(v) सः जवेन गन्तुम् अशक्तः च आसीत् ।

(vi) कृषकः तमुत्थापयितुम् बहुवारं यत्नमकरोत् तथापि सः नोत्थितः ।

(vii) सः वृषभः हलमूढ्वा गन्तुम् अशक्तः क्षेत्रे पपात ।

(viii) तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः आसीत् ।

**18.** अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत । (केवलं प्रश्नत्रयम्) *3×1=3*

(i) कथा चेयं <u>श्लाघ्या</u> सरसिरुहनाभस्य नियतम् ।

(a) उन्नता (b) अलौकिका

(c) प्रशंसनीया (d) निन्दनीया

(ii) अहं शीतले जले अविचलः <u>स्थितप्रज्ञः</u> इव तिष्ठामि ।

(a) प्रज्ञा (b) योगी

(c) भोगी (d) रोगी

(iii) कस्यापि <u>पुरतः</u> मा ब्रूहि दीनं वचः।

(a) अग्रे (b) पृष्ठतः

(c) गच्छतः (d) उच्चैः

(iv) अन्येषां <u>वदने</u> ये तु ते चक्षुनामनी मते ।

(a) मस्तके (b) दशने

(c) हृदये (d) मुखे